Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(5), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# श्रीमद्रामायणोक्तः अधार्मिक नाशोऽपि अहिंसा

**B.V.G.S.S. SWAMY**
Research Scholar
Dept. of Sanskrit
Andhra University
Visakhapatnam.

## वालिवधः –

कबन्धस्य शबर्याश्च वचनमनुसृत्य रामलक्ष्मणौ सुग्रीवं द्रष्टुं पम्पातीरं आगतौ । तत्र सुग्रीवः पर्वतस्थः एवं रामलक्ष्मणौ दृष्ट्वा वालि प्रेषितौ इति शङ्कया भीतः। हनुमान्अपि ब्राह्मणरूपेण आगत्य श्रीरामवृत्तं ज्ञात्वा सुग्रीवं निवेद्य रामसुग्रीवयोः मैत्रीं कारयामास । रामोऽपि वालिनं हत्वा ते राज्यं प्रदास्यामि इति सुग्रीवाय वाचं ददौ। सुग्रीवोपि रावणं हत्वा पुनः मैथिलीं प्राप्स्यसि तत्र अहं ते सहायको भवामि इति अन्योन्य सहकाररूपम् सन्धिमपि चक्रतुः ।

**सत्यं तु प्रतिजानामि त्यज शोकमरिंदम ।**
**करिष्यामि तथा यत्नं यथा प्राप्स्यसि मैथिलीम् ।।**
**रावणं सगणं हत्वा परितोष्यात्मपौरुषम् ।**
**तथाऽस्मि कर्ता नचिराद्यथा प्रीतो भविष्यसि ॥**
**वालिसंज्ञममित्रं ते भ्रातरं कृत किल्विषम् ।**
**शरैर्विनिहतं पश्च विकीर्णमिव पर्वतम् ॥**

श्रीमद्रामायणम्, किष्किन्धाकाण्डे - 7/3,4 श्लोक: पृ- 1422, 1427

एवमन्योन्यं प्रत्यायितौ तौ स्वकार्य साधनायस्व स्व यत्नान् चक्रतुः। रामेण प्रेषितःसुग्रीवः नियुद्धे वालिना पराजितः । द्वयोः तुल्यरूपत्वात् भेदं ज्ञातुमशक्तः रामः प्रमादेन सुग्रीवो हतो भविष्यति इति शंकया शरं न मुक्तवान् । ततः गजपुष्पमालिका अलंकृतः सुग्रीवः पुनः वालिनं युद्धाय आजुहाव । ततो वृक्षान्तरितः रामः शरमोक्षेण वालिनं हतवान् । तदा किष्किन्धाकाण्डे सप्तदशे सर्गे अष्टादशसर्गे च वालिनो वधः धर्मः अधर्मो वा हिंसाच समञ्जसा न वेति चर्चा श्रीमद्रामायणे विस्तरेण दर्शिता।

**वालिनः मते हिंसायाः निन्द्यता** - बाणेन हतः मरिष्यन् वाली राममुद्धिश्य तत्कृत हिंसा निन्दकानि बहूनि वाक्यानि उक्तवान्। हे राम ! त्वं धर्मज्ञः इति प्रसिद्धः ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(5), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**तमः रामः क्षमा धर्मो धृतिः सत्वं पराक्रमः ।**
**पार्थिवानां गुणा राजन् दण्डश्चाप्यपकारिषु ।।**

श्रीमद्रामायणम्, किष्किन्धाकाण्डे -17 / 19श्लोकः130, पृ-1477

मया वद्विषये न कश्चित् अपराधः कृतः ततोऽहं न दण्ड्यः राजानः अपि फलेन विना हिंसां न कुर्युः एव।

**भूमिर्हिरण्यं रूपं च निग्रहे कारणानि च।**
**तत्र कस्ते वने लोभो मदीयेषु फलेषु वा ।।**
**नयश्च विनयश्चोभौ निग्रहानुग्रहावपि ।**
**राजवृतिरसंकीर्णा न नृपाः कामवृत्तयः ॥**

श्रीमद्रामायणम्, किष्किन्धाकाण्डे - 17/31,32 श्लोकः, पृ-1472

पुनः च राममेवं निनिन्द त्वं कामप्रधानः कोपस्वभावः, स्थैर्यरहितः शुद्धं राजवृत्तं नानुसरसि । धर्मे ते पूजा बुद्धिः नास्ति इन्द्रियैः आकृष्टोऽसि । यश्च राजानं हन्ति, ब्राह्मणं हन्ति, गां हन्ति चोरः प्राणिवधतत्परः नास्तिकः ज्येष्टभ्रातुः पूर्वं कृतपरिणयः इत्येते नरकं प्राप्नुवन्ति । ब्राह्मणेन क्षेत्रियेण च पञ्चनखयुक्ताः जन्तवः पञ्चैव भक्ष्याः।

**पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव ।**
**शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः ॥**

श्रीमद्रामायणम्, किष्किन्धाकाण्डे - 17/31,32 श्लोकः, पृ-1473

वानरस्य मे चर्म मांसं वा अस्पृश्यं एवम् पञ्चनखोऽपि अहं अभक्ष्यः । सुग्रीवस्य प्रियं कर्तुं अहं त्वया निपातितः किन्तु ततः प्रागेव यदि मांतदर्थे आश्रितः चेत्एकेन दिनेनैव तव भार्यापहारिणं रावणं कण्ठे बद्धा आनीय ते परतः स्थापयित्वा मैथिलीमपि प्रत्यर्पितां कुर्यामेव । यदि त्वं धर्मज्ञोऽसि मम प्रश्नान् समाधाय त्वां धार्मिकं निरुपयितुमर्हसि ।

**रामेण वालिवध समर्थनम्** - यदा वाली आत्मानं धर्मार्थगुणसम्पन्नं मत्वा रामं निनिन्द तदा रामोऽपि तद्वाक्यं निराकर्तुं स्वकृतं वालिवधं समर्थयामास । रामकृतं समर्थनं च (4-65) षष्ट्याधिकैः श्लॉकैः किष्किन्धाकाण्डे अष्टादशे सर्गे वर्णितम्। वालिन् त्वं धर्मार्थकामविषयान् लोकाचारंच अज्ञात्वा मूर्खः मां निन्दसि । ये च वृद्धाः धार्मिकाः तान् अपृष्ट्वा वानरचापल्येन वक्तुं नार्हसि। इयं भूमिः सर्वापि इक्ष्वाकु वंशजानामेव भवति । भूम्यां मृगाः, पक्षिणः, मनुष्याः अपि इस्वाकुभिः अनुग्राह्याःनिग्राह्याः च। भरतः इदानीं भूमिम् शास्ति तस्य प्रतिनिधिरहं अत्र धर्मं स्थापयितुं नियुक्तः त्वं पुनः धर्मस्य क्लेशकरः कामवृत्रः राजधर्मे न स्थितः ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(5), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**ज्येष्ठो भ्राता पिता वाऽपि यश्च विद्यां प्रयच्छति ।**
**त्रयस्ते पितरो ज्ञेया धर्मे च पथि वर्तिनः ॥**

श्रीमद्रामायणम्– किष्किन्धाकाण्डे -18/13श्लोकः, पृ -1477.

यवीयान् भ्राता पुत्रो भवति जीवति सुग्रीवे त्वं तस्य भार्यामपहृतवान् एषः परमः ते अपराधः ततः त्वं भ्रातृभार्या अभिमर्शेन दण्ड्यः असि । अतः आधर्मिकं त्वां क्षत्रियोऽहं न मर्षये कामचारिणः वधः एव दण्डः स्मृतः ।

**तदेतत्कारणं पश्च यदर्थं त्वं मया हतः।**
**भ्रातुर्वर्तसि भार्यायां त्यक्त्वा धर्मं सनातनम् ॥**
**अस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः ।**
**रुमायां वर्तसे कामात्स्नुषायां पापकर्मकृत् ॥**
**तद्व्यतीतस्य ते धर्मात्कामवृत्तस्य वानर ।**
**भ्रातृभार्याभिमर्शेऽस्मिन्दण्डोऽयं प्रतिपादितः ॥**
**नहि लोक विरुद्धस्य लोकवृत्तादपेयुषः ।**
**दण्डादन्यत्र पश्यामि निग्रहं हरियूथप ॥**
**नच ते मर्षये पापं क्षत्रियोऽहं कुलोद्गतः ।**
**औरसीं भगिनीं वापि भारायां वाप्यनुजस्य यः॥**
**प्रचरेत नरः कामात्तस्य दण्डो वधः स्मृतः।**

श्रीमद्रामायणम्– किष्किन्धाकाण्डे -18/13श्लोकः, पृ -1478

**ननु भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं प्रियाम् ।**
**धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः ॥**

श्रीमद्रामायणम्- किष्किन्धाकाण्डे - 18/19 श्लोकः, तिलकटीका– पृ -1478,1479

इत्यग्रे प्रायोपवेशसमयेऽङ्गदोक्तेः सुग्रीवस्यापि ज्योष्ठभ्रातुः पितृसमस्य भार्यावमर्शनं तुल्यमित्यत आह- अस्य त्वमिति । धरमाणस्य प्राणान्धारयत एव जीवतस्त्वया निश्चीयमानजीवनस्यैव पत्न्यां तव स्नुषाभूतायां रुमायांयतो वर्तसे, अतस्त्वं स्पष्टं पापकर्मकृत् । सुग्रीवस्तु तव जीवन निश्चयाभावात्त्वत्पत्न्यां तारायां प्रागवर्तिष्ट अतः परं वर्त्स्यति च । किंच त्रैवर्णिकेष्वपि देवरस्य मृत भातृ स्त्रियामपुत्रायां वृत्तिदर्शनातिर्योग्योनिषु तस्यां वृत्तिर्न दोषः । तथावृत्तौ च मरणज्ञानमेव प्रयोजकं तिर्यस्विति भगवदाशयः । अनेन त्रैवणिकेतर स्त्रीणांमृतभर्तृकारणां तरुणीनां स्वजातीय पुरुषाङ्गीकारो नाधर्म इति सूचितम्। दृश्यते च तथा व्यवहारः शूद्रादिजातौ । न च

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(5), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

मनुष्याधिकारस्य निषेधादिशास्त्रस्य कथं तिर्यक्षु प्रवृत्तिरिति वाच्यम्। तिर्यग्योनेरपि मनुष्यवन्द्राजादिव्यवहारदर्शनेन मनुष्यतुल्यज्ञानवत्वादस्त्येवायं दोष इत्याशयात् । किं च धर्मेऽनाधिकारिणामपीन्द्रादीनां वृत्रवधादौ ब्रम्हत्यादिदोषस्मरणेन निषेधेषु तदतिक्रमप्रायश्चित्तादौ च देवानामधिकारवदेयामप्यधिकारे वाधकाभावः। किञ्च देवादीनां स्वमजनीयेन्द्रान्तराभावादनधिकार इति पूर्वमीमांसायां निर्णीतम् । एवं च तदनपेक्षदानादिधर्मेषु ब्रह्मविद्यायांच अधिकारोऽस्त्येवेत्युत्तरमीमांसायां स्पष्टम् । तद्वदीदृशानां ज्ञानवतां निरश्चामप्यधिकारे बाधकाभावः । किं च सर्वदेवता वाचकपदानामन्त्रयामीश्वरवाचकत्वेन सर्वत्र देवानामधिकारोऽस्त्येव । न च ब्राह्मणत्वाद्यभावातेषामनधिकारः तेषामपि क्षत्रियत्वाद्वैवस्वत मन्वादेरिव । अत एव चन्द्रवरुणादीनां यज्ञः स्मर्यते पुराणेषु । तत्र तत्र कर्मण्यर्थवादतः फलकल्पन तत्पुराणस्यर्थवादैस्तदधिकारस्यापि कल्पयितुं युक्तत्वात् किंच । त्रैवर्णिकस्याधिकार इत्यत्रत्रैवर्णिकपदं वेदतदर्थज्ञानवत्परम् । अतो देवादीनां तदधिकारः सिद्धः इति भगवतो व्यास, वाल्मीकिप्रभृतीनां चाशयः । जैमिनेस्त्वेतदंशेऽज्ञानमेव । अत एव तदूरीकरणार्थं मार्कण्डेयेनात्मानं प्रति धर्मान् पृच्छतो जैमिनेविन्ध्यारण्यवासितत्त्वज्ञपक्षिमुखेन धर्मबोधनं कृतम्। तेन हि पक्षिणां ज्ञानामधिकार इति स्वोक्तेस्तस्याविश्वासे जातेऽन्यत्रापि व्यासादि विरुद्धे स्वोक्तेऽर्थे तस्याप्रामाण्यग्रहो भविष्यतीति तदाशय इत्यन्यत्र विस्तरः ।

अपि च त्वं मृगोऽहं न हन्तव्यः इति यदुक्तवान् तन्न युक्तम्। यदि त्वं मृगोऽसि तदा युद्धयन् अयुद्धयन् वा हन्तव्यः एव यदि न मृगः त्वं मानवः इव राज्याभिषेकादिषु व्यवहरसि । ततः ते वधः दण्डः एव भवति ।**"अदण्डयान् दण्डयन् राजादण्डयान् वापि अदण्डयन्"**नरकभाक् भवति । राज्ञः प्राप्तदण्डः दण्ड्यः विगत कल्मषः स्वर्गं प्राप्नोति मम पूर्वजाः अपि पापिष्ठेषु कृत दण्डाः श्लाघ्याः श्रूयन्ते ।

**राजभिर्धृतदण्डाश्च कृत्वा पापानि मानवाः।**
**निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ।।**
**शासनाद्वापि मोक्षाद्वा स्तेन पापात्प्रमुच्यते ।**
**राजा त्वशासन्पापस्य तदवाप्नोति किल्विषम् ।।**

श्रीमद्रामायणम्, किष्किन्धाकाण्डे - 18/31,32 श्लोकः, पृ- 1481

एवं रामेण समाहितः वाली ताराम् अङ्गदं च सुग्रीवे अर्पयित्वा रामं क्षमां ययाचे।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(5), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**स तस्य वाक्यं मधुरं महात्मनः समाहितं धर्मपथानुवर्तितम् ।**
**निशम्य रामस्य रणावमर्दिनो वचः सुयुक्तं निजगाद वानरः॥**
**शराभितप्तेन विचेतसा मना प्रभाषितस्त्वं यदजानता विभो ।**
**इदं महेन्द्रोपमभीमविक्रम प्रसादितस्त्वं क्षम में हरीश्वर ।।**

श्रीमद्रामायणम्, किष्किन्धाकाण्डे - 18/65,66 श्लोकः, पृ- 1487

समाजोपयोगिता - शासकेन येन केनापि प्रकारेणधर्मरक्षणं कार्यमिति सन्देशः अत्र समाजाय दत्तः । शासकस्य प्रतिनिधिः सर्वतोमुखः धर्म पश्चन् धर्मसूक्ष्मान् च विचार्य दण्डयान् दण्ट्येत् । दण्ड्येष्वपि तारतम्यविचारोऽपि कार्यः। यदि अविवेकी अधर्मं कुरुते तदा स्वल्पदण्डेन वारणीयः । विवेकिनः अपराधस्य दण्डः अधिकतमोभवेदित्यपि वालिवधेन सूचितम् ।

परान् आश्रित्य कार्य साधन विषयेऽपि सर्वथा आत्मगौरवस्य हानिः यथा न भवति तथा परेषां सहायं अभ्यर्थनीयम् । वालिनं विहाय दुर्बलं सुग्रीवं रामः कथमाश्रितवान् इति शङ्का भवत्येव । वाली इन्द्रजः सुग्रीव सूर्यजः इति रामस्य सगोत्रजः । एवं मारुतिरपि सूर्येणादिष्टः सुग्रीवं सेवते ।

ततः सुग्रीवः एव अनुसरणीयः इतिअनर्घराघव नाटके मुरारिणा स्पष्टम् उक्तम् ।अपिच सुग्रीवः रामेण कार्यार्थी ततः सुग्रीवकार्यं साधयित्वा अन्योन्य सहकाररूपं सन्धिं कृत्वा रामः राजधर्मं अनुसृतवान् भवति । वालिनं ययाश्रयेत तदा रामस्य गौरवहानिः भवति । ततः रामेणाचरितं सर्वं ससङ्गतमेवेति अनर्घराधनवे स्पष्टम् ।(अनर्धरादधवम् - द्वितीयाङ्के – शुनश्शेफवचनम्–पृ-123)

आञ्जनेयः सीतन्वेषणे समर्थः इति पूर्वमेव ज्ञात्वा स्वशिष्यं आञ्जनेयं सुग्रीवसहायकं भगवान् सूर्यः नियुक्तवान् ।पुरैव किलायमाञ्जनेयो भगवतः सहस्र किरणात् व्याकरणविद्यामधीयानस्तदात्मजन्मनो वानरयोनेः सुग्रीवस्य साहायकमभिप्रायज्ञो एकदक्षिणी चकार । अपि च सुग्रीवः सनाभिरिति रामेण अनुसरणीयः इत्यपि रामाभिप्रायः ।रामः - किमुच्यते सुग्रीव सनाभिरयमस्माकम् । अस्य हि प्रभवो भगवानैश्वाकस्य राजर्षि वंशस्य प्रसविता सहस्र दीधितिः। (अनर्धरादधवम् - पञ्चमाङ्के – रामवचनम्–पृ-471)

अपिच लक्ष्मणः एव किमर्थं वालीउपेक्ष्यः इति रामं पृष्टवान् ततो रामः तां शंकां एवं निवारयामास । वाली रावणं जित्वा पराक्रमगर्वितो वर्तते ततः अस्माभिः सन्धिं नेच्छति । केनापि कारणेन अस्माकं सहायको भवितुमपि नेच्छति गतः अस्माभिः साध्यं किमपि तस्य न वर्तते । वालिनः वधेन सुग्रीवः बलवान् भवति उपकृतः प्रत्युकारं चिकीर्षति। ततः वाली सहजमित्रं सुग्रीवः कृत्रिम मित्रंचभवति । येन वैरकरणे कारणं न वर्तते सः सहजमित्रं

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:3(5), March 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

उपकारेण कृता मैत्री दृढतरा भवतीति उपकृतः कृत्रिममित्रम् । एवं सहजशत्रुः कुत्रिमशत्रुश्च भवतः । शत्रुमित्रयोः अपि कुत्रिमावेव गरीयांसौ इति राजनीतिः। यदाहुः–

**सखा गरीयान् शत्रुश्च कुत्रिमस्तौ हि कार्यतः।**
**उपकारापकारों हि लक्ष्यं लक्षणमेतयोः ॥**
**उपकारिणा सन्धिर्न मित्रेणापकारिणा ।**
**स्यातामित्रौमित्रे च सहज प्राकृतावपि ॥**

शिशुपालवधम् - द्वितीयसर्गे - 36,37श्लोकः, पृ- 40,41

एवं राजनीतिमनुसृत्य सुग्रीवः एव सन्धेयःवाली संहितोऽपि पश्चादपकारी भवेत् यदि परस्त्री सञ्जातस्य स्वपुत्रस्य वधेन इन्द्रः मह्यं कुप्यति तदा केनापि प्रकारेण इन्द्रम् अनुनेष्यामि इति रामः स्पष्टमुक्तवान्।

दृत्यत्पौलस्त्यकण्डूभिदुरभुजभरोष्मायमाणः कपीन्द्रो नायं नः सन्दधीत कृचिदपि हि विधौ नैव साहाय्यकामः । सोऽहं सुग्रीवमेतद्दमनदृढतरं मित्रमिच्छामि पश्चत्पारस्त्रैणेय पुत्रव्यय शिथिलशुचं शक्रयाराधयामि ।(अनर्धराघवम् - पञ्चमाङ्के - 32 श्लोकः, पृ- 481,482)

एवं लोकोपकाराय वालिना न कृत सन्धिः श्रीरामः सुग्रीवेण सधित्सुः वालिनं हतवान् इत्यत्र हिंसा लोकोपकाराय अभूत्। क्वचित् वालिना कृत सन्धिरपि रावणः कर्णजपो भूत्वा वालिनं स्वमार्गे स्थापयति चेत् रावणः दुर्जयो भूत्वा लोकस्य अपकारो भवति इति वालिनः वधः हिंसात्मिकापि लोकोपकारकः अभूत् । ततः समाज हिताय कृता हिंसा क्वचित् स्वार्थोपकारिकापि करणीया एवेति वालिवधात् अवगम्यते ।

## उपयुक्तग्रन्थसूची

1. *श्रीमद्रामायणम्*- गीताप्रेस्, गोरखपुरम् -२०१६
2. अनर्घराघवम् - निर्णयसागरमुद्रणालयः, मुम्बई -१९२५
3. *शिशुपालवधम्*(मल्लिनाथटीकासहितम्), चौखम्बा संस्कृत सीरीज्, वाराणसी -१९७०